# बुद्धचरितमहाकाव्यप्रथमसर्गविमर्शः

**उत्तमप्रसादखतिवडाः**

*सहप्राध्यापकः, विश्वविद्यालयविद्यापीठम्, विल्वकुञ्जम्, दाङ्गः*

up.sharma977@gmail.com

**शोधसारः**

*महाकविनाश्वघोषेणाष्टाविंशतिसर्गात्मकं बुद्धचरिताख्यं महाकाव्यं विरचितम्, परं दैवदुर्नियोगाद्ग्रन्थोऽयमंशतो नष्टो भ्रष्टश्च। सम्प्रति संस्कृते चतुर्दशसर्गात्मकमेव काव्यं राजते। तत्रापि प्रथमसर्गस्य चतुर्दशसर्गस्य च केचनांशाः खण्डिताः विलोक्यन्ते। ग्रन्थप्रकाशनसन्दर्भे सम्पादकैस्तत्तदंशा यद्यपि प्रपूरितास्तथापि प्रतिप्रकाशनं सम्पादकभेदात् पाठभेदाः समजायन्त। संरचनादृष्ट्या काव्यतत्त्वविद्भिरत्र काचिन्न्यूनतावलोकिता परं विषयवस्तुदृष्ट्या च काव्यमिदं सर्वोत्कृष्टतां भजते। काव्यान्तर्गतानि विशेषवचनानि पाठकानां चेतांसि प्रसभं समाकर्षन्ति। बुद्धस्य जन्मप्रसङ्गाद् बुद्धत्वप्राप्तिपर्यन्तस्य महत्त्वपूर्णः प्रसङ्गोऽत्र रोचकशैल्या प्रदर्शितः। बुद्धस्य दार्शनिकसिद्धान्तो लोकोत्तरं जीवनचरितं च काव्येऽस्मिन्ननुभूयते। भगवदंशावतारस्य बुद्धस्य एतादृशं महनीयं चरित्रचित्रणमितोऽन्यत्र न कुत्रापि प्राप्यत इति चिन्तकानां निष्पक्षानुभूतिर्वरीवर्ति। प्राय एत एव विषया आलेखेऽस्मिन् चर्चिता विमृष्टाश्च विद्यन्ते। बुद्धचरितमहाकाव्यसम्बद्धानां विषयाणां चिन्तनेन विश्लेषणेन सह विशेषतः प्रथमसर्गस्य वर्ण्यविषयाः अत्रोपस्थापिताः। भगवत्प्रसूतिरित्याख्ये प्रथमसर्गे विजने लुम्बिनीवने शाक्यकुमारबुद्धस्यासाधारणी जनिर्वर्णिता। सद्यः जातस्य बालकस्य कल्पनातीताश्चेष्टाः 'बोधाय जातोऽस्मि जगद्धितार्थम्' इत्यादिभणितिश्च पाठकश्रोतॄणां चेतांसि सकौतुकावेशं प्रसभमावर्जयति। काव्यसरणिमाश्रित्य बुद्धस्य दर्शनं चारुचरितं च कविना जगति प्रचारितमिति सर्वैर्ध्येयो ज्ञेयश्च विषयः। मूलत एत एव विषयसन्दर्भा अध्ययनेऽस्मिन् समावेशिता विश्लेषिताश्च वेविद्यन्ते।*

**विशेषशब्दाः**

उदन्तः, गर्हणम्, दुर्नियोगः, परिपाटी, विरतिः।

**विषयपरिचयः**

संस्कृतसाहित्ये बहूनि महाकाव्यानि सन्ति। अनेककालावच्छेदेनानेकदेशावच्छेदेन च विरचितानि अनेककविसम्बद्धानि तानि सर्वाण्यपि महाकाव्यानि समानतया नैव ख्यातिं यान्ति। ख्यातान्यपि कानिचन दुरतिक्रमकालकवलनात् तथा सामाजिकधार्मिकराजनैतिकपरिवृत्तिपरिवेशाच्च गुप्तिं लुप्तिं च भजन्ते। तादृशेष्वेव महाकाव्येषु बुद्धचरिताख्यमिदं महाकाव्यमपि परिगण्यते। यद्यप्येवंविधानि काव्यानि विरलानि, तथापि दुर्दैवात् काव्यरसिकानां सहृदयानां दृष्टिपथं तानि नैवावतरन्ति अपितु कालोदरदरीं भजमानानि जीर्यन्ति क्रमशः शीर्यन्ते च। काव्यमिदं बुद्धचरितं साकेतनिवासिना भगवतो बुद्धस्य परमभक्तेन भिक्षुस्वरूपिणा महाकविनाश्वघोषेण विरचितं विद्यते। महाकाव्येऽस्मिन् भगवतो नारायणस्यांशावतारत्वेन प्रथितस्य शाक्यकुलोद्भवस्य शौद्धोदनेर्बुद्धस्य लोकोत्तरं चरितं

यथायथं समुपनिबद्धं प्राप्यते। "अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः" (वेदव्यास, २०७५, पृ. ३४) इति पौराणिकोक्तेः विष्णोरवतारा यद्यपि संख्यातीतास्तथापि प्रमुखदशावतारेषु बुद्धावतारः संगृह्यते भगवदवतारविद्भिर्विद्वद्भिः। त्रेतायां इक्ष्वाकुवंशे यथा दाशरथेः रामस्य जनिरभूत् "इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः" (वाल्मीकिः, सन् १९६०, पृ. ५०) इति तथैव कलौ तस्मिन्नेवेक्ष्वाकुवंशे शौद्धोदनेः सिद्धार्थस्य जननमजायत। जगति रामस्यागमनं लोकपर्यादां सर्वत्र परमादर्शं च दर्शयामास। एवमेव बुद्धस्यागमनं मानवजीवनस्य त्यागमूलकत्वं पारमार्थिकं सन्मार्गं चाशिक्षयत्। रामः प्रागैतिहासिकः पुरुषः मर्यादापुरुषोत्तमरूपेण सर्वैः स्मर्यते, पूज्यते चेत्, बुद्धः ऐतिहासिकः पुरुषः शान्तेः प्रतिमूर्तिरूपेण जगद्वन्द्यो विराजते। उभयोरेवांशावतारयोः सुविपुला कीर्तिः निर्मलं चरितं च जगदभिव्याप्नोति। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायात् भगवानपि किमपि विशेषप्रयोजनं निर्वर्तयितुमेवांशावतारमधिगच्छति। मत्स्यकूर्मादिदशावताराणां प्रमुखं प्रयोजनं स्मृतिपुराणेतिहासेषु बहुधा व्याख्यातमेव। स्वल्पैः शब्दैः दशावतारमाहात्म्यं केनचित्कविना साधूपन्यस्तं यथा- यस्यालीयत शल्कसीम्नि जलधिः .... ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः ॥ (विश्वनाथ, २०७६, पृ. २६) इति। अस्य मत्स्यकूर्मादिकल्क्यन्तानां दशावताराणां प्रमुखं कर्म विशेषमाहात्म्यं वा प्रपञ्चितं वरीवर्ति। तत्र च प्रकृतप्रसङ्गसम्बद्धो बुद्धः 'यस्य ध्याने विश्वमलीयत' इति पदकदम्बाकलितोऽजायत। अनेन तथ्येन ध्यानादियोगमार्गसम्बद्धः शौद्धोदनिर्बुद्धः पारमार्थिकसन्मार्गप्रचारकः शान्तिसन्देशसंवाहकश्चेति गम्यते। दशावतारेषु राजकुलगतत्वेन दाशरथिः रामः शोद्धोदनिर्बुद्धश्च समजायत। एकः सकुटुम्बः सन् आदर्शराज्यसञ्चालनेन मर्यादापालनेन च प्रथितश्चेदपरोऽकुटुम्बः सन् आदर्शराज्यत्यागेन मर्यादाशिक्षणेन च प्रसिद्धिमगात्। चारुचरित्रावुभावेव सहस्राधिकसंवत्सरपूर्वात् सहस्राधिकजनानां श्रद्धास्पदौ वन्दनीयौ स्मरणीयौ कीर्तनविषयौ चाभूताम्। रामचरितसम्बद्धानि तु सन्ति शतसहस्रसंख्यकानि काव्यरत्नानि परं न तथाविधानि बुद्धचरितसम्बद्धानि ग्रन्थरत्नानि। तत्रापि संस्कृतभाषासम्बद्धं बौद्धसाहित्यं तु नितान्तं दुर्लभमेव। अतः संस्कृतसाहित्यजगति बुद्धचरितमहाकाव्यस्य स्थानं अनितरसाधारणं महन्महनीयं च वरीवर्ति। काव्यस्यास्य रचयिता महाकविरश्वघोषोऽतिप्राचीनो मन्यते। भारतवर्षे भारतीयैः काव्यस्यास्योपादेयत्वं नैवानुभूतमथवा बौद्धधर्मदर्शनसम्बद्धत्वादस्योपरि सानुरागेक्षणं नैव जातम्। यत्किमपि स्यात् सम्प्रति बुद्धचरितस्य समग्रमूलपाठाप्राप्तौ तदानीन्तनानां उपेक्षाबुद्धिरेव मूलं कारणम्। श्रीमताश्वघोषेण विरचितं बुद्धचरिताख्यं महाकाव्यम् अष्टाविंशतिसर्गात्मकमासीत्। यस्य धर्माक्षरनामकेन भारतीयविदुषा चीनभाषायां विहितेऽनुवादे अष्टाविंशतिसर्गा एव सन्ति। ४१४-२१ ईशवीये वर्षेऽनुदिते तस्मिन् काव्ये बुद्धस्य जन्मन आरभ्य निर्वाणपर्यन्तस्य कथा वर्णिता प्राप्यते। एवमेव सप्तमशताब्द्यां केनचित् कविना विहिते बुद्धचरितस्य तिब्बतीभाषानुवादेऽपि अष्टाविंशतिसर्गा एव सन्ति। एतावता संस्कृतबुद्धचरितं नितान्तमपूर्णं विद्यते। संस्कृते सप्तदशसर्गात्मकं बुद्धचरितं समुपलभ्यते। तत्रापि चतुर्दशसर्गात् चत्वारः सर्गाः अमृतानन्दनामकेन विदुषा उनविंशतिशताब्द्याः प्रारम्भे संयोजिता इति समामनन्ति इतिहासविदः। चतुर्दशसर्गान्तं यावत् बुद्धस्य बुद्धत्वप्राप्तिपर्यन्तस्य कथोपनिबद्धा दृश्यते। चतुर्दशसर्गात्मकस्य बुद्धचरितस्य च चतुर्दशसर्गो पूर्णो नास्ति तथा प्रथमसर्गोऽपि खण्डितो विद्यते। प्रथमसर्गश्च आरम्भात् सप्तमपद्यं यावत् तथा पञ्चविंशाच्चत्वारिंशपद्यं यावत् खण्डितमनुभूयते। तच्च तत्तद्ग्रन्थसम्पादकैः चीनभाषानुवादादिकमाधृत्य परिपूरितमस्ति। अतस्तत्र महान् पाठभेदः शैलीभेदश्च प्राप्यते। अस्य काव्यस्य आङ्गलभाषायामपि अनुवादः प्राप्यते। अक्सफोर्डविश्वविद्यालयस्य संस्कृतविदुषा प्रा.डा. जोन्स्टनमहोदयेन काव्यमिदमनुदितमासीत्। आङ्गलभाषासम्बद्धोऽयमनुवादः प्रामाणिकः आधिकारिकश्च

मन्यते। आङ्गलभाषानुवादमवलोक्यैव संस्कृतविद्भिः मूलग्रन्थस्य खण्डितांशः परिपूरितोऽस्तीति जोन्स्टनमहोदयः सर्वदैव बुद्धचरितकाव्यसन्दर्भे स्मरणीयो विराजते। बुद्धचरितस्य रचना कदा जाता इति निश्चित्य वक्तुं तु नैव शक्यते परं पूर्वापरानुसन्धानेनावश्यमनुमातुं प्रभवामः। यद्यपि संस्कृतकाव्यकाराणामन्येषां महाकवीनामिव कवेरश्वघोषस्यापि आद्यन्ता जीवनी काष्ठमौनमाधत्ते, तथापि तद्रचनादिगतसङ्केतमाध्यमेन जीवनवृत्तमंशतोऽधिगन्तुं पारयामः। बौद्धप्रस्थाने समर्पितस्य भदन्तवाददीक्षितस्य चाश्वघोषस्य काव्यमिदं बुद्धचरितं यद्यपि संस्कृतमहाकाव्यसिद्धान्तोक्तलक्षणदिशा नैवोत्कृष्टतां भजते तथापि काव्यरत्नस्यास्य पृथग्धर्मेण किमप्यनितरसाधारणमृत्कृष्टं स्थानं वरीवर्ति। बहवो बौद्धाः तदितरे रसिकाश्च काव्यमिदं समुक्तकण्ठं प्राशंसिषुः। केचन विद्वांसस्तु बौद्धधर्मदर्शसम्बद्धं बुद्धचरितप्रचारकं अद्वितीयं कृतिरत्नं मन्यते। सप्तमशताब्द्यां समग्रं भारतवर्षं भ्रमता चीनदेशीयेनैव इत्सिङ्ग-(इत्संघा)महोदयेन च अस्य काव्यस्य चर्चा तदनु काव्यस्यास्य रचयितुः अश्वघोषस्य चोल्लेखो विशेषेण विहितोऽस्ति। (शर्मा, सन् १८३३, पृ.४) । एतावता इदानीं न तथा प्रचारादिकं विद्यतेऽस्य काव्यस्य यथा प्राचीनकाले आसीदिति समाकलयामः। प्राप्तसंस्कृतकाव्यानुसारं भगवत्प्रसूतितः बुद्धत्वप्राप्तिं यावत् बुद्धसम्बद्धा कथा विन्यस्ता विलोक्यते। चतुर्दशसर्गाणां कथानुकूलमभिधानं तथा लौकिकशृङ्गारादिरसापेक्षयाऽलौकिकरसभावादिबोधनं काव्यस्यासाधारणं वैशिष्ट्यमवगच्छामः। अत्राध्ययने च तस्यैव काव्यस्य प्रथमसर्गान्तर्गताः विषयाः यथासम्भवं विवेचिता विद्यन्ते।

## अध्ययनस्य प्रमुखाः समस्याः

बुद्धचरितसम्बद्धानि विवेचनानि अध्ययनानि च यद्यपि बहूनि सन्ति सम्पन्नानि तथापि विषयविवेचनदृष्ट्या काव्यस्यास्याध्ययनमवशिष्टमेव विद्यते। काव्यमिदं बहुप्राचीनं विषयवस्तुदृष्ट्या गभीरं चास्ति परन्तु बहूनां विदुषां विवेचनात्मिका विश्लेषणात्मिका च दृष्टिरत्र न दृश्यते। विषयप्रतिपादनशैल्या भाषाप्रयोगसरण्या च काव्यमिदं कालिदासादीनां काव्यग्रन्थैः साम्यं भजते। तथापि गूढार्थप्रकाशिका, काव्याशयद्योतिका वा कापि संस्कृतटीका दृष्टिपथं श्रुतिपथं वा नैव समायाति। एतादृश्यां स्थितौ काव्यमिदं बहुविचारणीयमिति सामान्यतयाध्ययनेऽस्मिन् वक्ष्यमाणसमस्याः दरीदृश्यन्ते।

क) बुद्धचरितमहाकाव्यस्य रचयिता कः ?

ख) बुद्धचरितमहाकाव्यस्य वर्ण्यं किम् ?

ग) बुद्धचरितमहाकाव्यस्य प्रथमसर्गस्य विषयः कः ? इति।

## अध्ययनस्योद्देश्यम्

बुद्धचरितमहाकाव्यं काव्यान्तरापेक्षया पृथग्धर्मविशिष्टमद्वितीयं काव्यं प्रतीयते। प्राचीनकालादेव बहुभिर्विद्वद्भिर्यथामति काव्यस्यास्य विषयाः समालोडिताः सहृदयसमाजे समालोचिताश्च सन्ति। तद्देशकालानुसारं तेषु तेषु विषयेषु प्रतिपादितेष्वपि प्रकृताध्ययनानुसारं निम्नाङ्कितान्युद्देश्यानि अत्र समायान्ति।

क) बुद्धचरितमहाकाव्यस्य रचयितुः परिचयप्रतिपादनम्।

ख) बुद्धचरितमहाकाव्यस्य वर्ण्यवस्तुविश्लेषणम्।

ग) बुद्धचरितमहाकाव्यस्य प्रथमसर्गस्य विषयविवेचनम्।

## अध्ययनविधिः

अध्ययनमिदं निष्पादयितुं प्रमुखसामग्रीसङ्कलनाय पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतो विद्यते। तत्र च बुद्धचरितमहाकाव्यमेवास्याध्ययनस्य प्रधानं स्रोतोऽस्ति चेत् तत्काव्यसम्बद्धाः व्याख्यानात्मकाः विश्लेषणात्मकाष्टीकात्मकाः समालोचनात्मका ग्रन्थास्तथा विविधस्थानात् विविधसमये प्रकाशिता तत्सम्बाद्धा आलेखाश्च सहायकसामग्रीत्वेन द्वितीयसामग्रीत्वेन वा संगृह्यन्ते। अध्ययनसौकर्याय पाठभेदादिसहिता तत्तद्ग्रन्थसम्पादकानां टिप्पण्यादिसंवलिताः विविधप्रकाशनसंबद्धाः बुद्धचरितमहाकाव्यात्मकाः ग्रन्थाः तन्निबद्धाः ग्रन्थान्तराश्च अध्ययनेऽस्मिन् समुपयुज्यन्ते। एतावता पुस्तकाध्ययनविधिरत्रत्यो मुख्यो विधिश्चेत् यथावसरं विषयविश्लेषणादिविधयश्च प्रयोगार्हा भवन्ति। एवमेव यथावश्यकं तुलना-मनन-चिन्तनादिविधयस्तथा विज्ञजनैः सह परामर्शादिकं विधाय विमर्शादिविधयश्च समालम्बिताः सन्ति।

## अध्ययनस्य क्षेत्रं सीमाङ्कनं च

बुद्धचरितमहाकाव्यमष्टाविंशतिसर्थात्मकं वर्णितम्। तत्रापि संस्कृते चतुर्दशसर्गात्मकमेव प्राप्यते। बुद्धस्य जन्मतः बुद्धत्वप्राप्तिपर्यन्तस्य वृत्तान्तस्तत्रोपन्यस्तः। अध्ययनेऽस्मिँश्च केवलं प्रथमसर्गसम्बद्धाः एव विषयाः विविच्यन्ते। काव्येऽस्मिन् प्रथमसर्थस्य नामधेयं “भगवत्प्रसूतिः” इति विहितमस्ति। तस्यैव सर्गस्य विश्लेषणमत्र विधीयते। अतः बुद्धचरितमहाकाव्यस्य प्रथमसर्ग एव अस्य अध्ययनस्य क्षेत्रम्, तदतिरिक्ताः सर्गाश्च सीमारूपाः सन्ति। केवलं प्रथमसर्गमधिकृत्यैव आलेखोऽयं निष्पादितोऽस्ति।

## बुद्धचरितमहाकाव्यस्य रचयितुः परिचयः

बुद्धचरितमहाकाव्यस्य रचयिता महाकविरश्वघोषो विद्यते। संस्कृतमहाकाव्यकारेषु अस्य कवेः नामधेयं प्रथमश्रेण्यामेव समायाति। कालिदासादीनां कवीनामिव अस्यापि जन्मदेशकालादिविषये विचित्कित्सा एव विद्यतेऽनुसन्धातृषु। संस्कृतवाङ्मयसमुपासकेषु विद्वत्सु आत्माभिधानविधानादिगोपनपरम्परातिदीर्घेति अवगम्यते। ‘आत्मनाम गुरोर्नाम नामातिकृपणस्य च।’ इत्यादिधर्मशास्त्रवचने विश्रब्धानां परिपाटीयं नास्वाभाविकी। तथापि अर्वाचीना विवेचकाश्चाध्येतारस्तद्विषयकविचारसरणौ चेखिद्यन्ते निर्विद्यन्ते च। सौन्दरानन्दमहाकाव्यस्यान्तिमवाक्पुष्पिकानुसारं कविरयं सुवर्णाक्ष्याः पुत्र आसीत्। साकेतराज्यं चास्य निवासभूमिरेवं बौद्धभिक्षुसम्प्रदाये चायं दीक्षितोऽभूत्। एतत्कृतकाव्यावलोकनेन साक्षिनिमीलनं वक्तुं शक्यते यत् – पुराणधर्मशास्त्रादीनामपि यथेच्छं ज्ञानमेतस्मिन्नासीत्। अतः कस्मिँश्चित् ब्रह्मकुले एव जनिमलभत। पूर्वं हिन्दुब्राह्मणसंस्कारानुसारमेवाश्वघोषस्य शिक्षादीक्षादिकं सम्पन्नम्। पश्चात् बुद्धधर्म-दर्शनादिषु समाकृष्टः तद्रागरञ्जितः सन् क्रमशफ बौद्धभिक्षुसम्प्रदाये दीक्षां जग्राह। कविरयं न केवलं बौद्धभिक्षुरासीत् अपितु बुद्धधर्मस्य तदुपदेशस्य च प्रचारकस्तथा धर्मप्रचारसंगठनस्य संवाहकश्चासीत्। तस्मिन् समये बौद्धभिक्षूणां संघः समुदायो वा विनिर्मितः जायते स्म। संघस्य प्रधानं कार्यं च धर्मप्रचारः बुद्धस्योपदेशवर्णनं चासीत्। अतः कविनानेनापि तत्प्रचाराय काव्यसाहित्यस्य संगीतादीनां वा सहाय्यमङ्गीकृतम्। फलतोऽस्य कवेः बुद्धचरितसौन्दरानन्दादयः कृतयः प्रादुरभूवन्। अस्य काव्यग्रन्थेषु मूलतो बुद्धसन्देश एवानुस्यूतो वेविद्यते। अनेन विरचितानां केषाञ्चन ग्रन्थतानां तु मुख्यो विषयः केवलं धर्मदीक्षा एव अस्ति। महान् धर्मप्रचारकोऽयमश्वघोषो बुद्धसन्देशप्रचाराय गायकानां गायिकानां च पृथक् संघटनं विधाय

सवाद्यवादनं संसारस्य दुःखरूपत्वद्योतकं क्षणभङ्गुरत्वख्यापकं च गीतं जनसमूहेषु श्रावयन् जनान् बुद्धधर्मं प्रति समाकर्षति स्म। ईशायाः सप्तमशताब्दे भारतवर्षं भ्रमता चीनदेशीयपथिकेन हु-एन्-सङ्गमहोदयेन तथा इत्सङ्गमहोदयेन च प्रसङ्गोऽयं समुल्लिखितोऽस्ति। तदा बौद्धमठेषु अश्वघोषस्य काव्यरचनादीनां पाठपारायणादिकं गानादिकं वा जायते स्म। एतावता बौद्धभिक्षुरश्वघोषस्तात्कालिको महाकविः, महान् धर्मप्रचारकश्चासीत्। एतादृशो महान् विद्वान् बौद्धभिक्षुस्तथा महाकविश्च कदा कुत्र जनिमलभतेति वक्तुमिदानीं यावत् नैव पारयामो वयम्। सौन्दरानन्दकाव्यस्य 'आर्यसुवर्णाक्षीपुत्रस्य साकेतस्य' इत्यादिवाक्यानुसारमस्य कवेः सामान्यतया जन्मस्थानं तु संसूच्यते परं साकेतराज्यमप्यासीद्विशालम्, तत्र कां भूमिं स्वजन्मनालञ्चकारेति प्रश्नो नैव परिसमाप्तिमेति। अयोध्याया एव प्राचीनं नाम 'साकेतम्' असीत्। 'जनस्य साकेतनिवासिनस्तौ०' (कालिदासः, सन् १९९०, पृ. ४०), 'साकेतनार्योऽञ्जलिभिः प्रणेमुः (कालिदासः, सन् २०००, पृ. ३८)' इत्यादिकथनानुसारं तज्ज्ञायते। जन्मस्थानविषये तु एतावत्सङ्केतोऽस्य कवेर्लब्धः। परं जनिकालविषये न सङ्केतग्रन्थोऽस्माभिः प्राप्यते। यद्यपि विषयोऽयं इतोऽपि विचारणीयोऽनुसन्धानार्होऽस्ति। तथापि काँश्चन पूर्वापरसन्दर्भान् विलोक्य कालनिर्धारणायानुसन्धातृभिर्नूनो यत्नो विहितोऽनुभूयते। महाकव्यश्वघोषविरचितस्य बुद्धचरितमहाकाव्यस्य चीनभाषायामनुवादः पञ्चमशताब्दे जात इति तत्पूर्वमेव काव्यमिदं विरचितमिति तस्मात् पूर्ववर्ती आसीदश्वघोषः। एवञ्च बुद्धचरितमहाकाव्यस्य अष्टाविंशतिसर्गे राज्ञोऽशोकस्य उल्लेखोऽस्तीति अशोकात् परवर्तिरूपेण अश्वघोषः प्रमाणितः। अशोकस्य कालश्च (ई.पू. २७३-२३२) ईशापूर्वः तृतीयशताब्द इति स्वीकुर्वन्ति विद्वांसः। अनेन तथ्येन ईशापूर्वद्वितीयशताब्दात् ईशायाः चतुर्थशताब्दपर्यन्तस्य अन्तरालकाल एव अश्वघोषस्य समयो निश्चितः। तत्रापि आधुनिकानुसन्धातुः प्रो.ल्युडर्समहोदयस्य कथनानुसारम् अश्वघोषः कनिष्कस्य समकालिको विद्यते। चीनदेशे प्रचलितकिंवदन्त्यनुसारमभिधर्मनामकबौद्धधर्मग्रन्थस्य विभाषाख्या व्याख्या अश्वघोषेणैव विहितास्ति। सा च व्याख्या कनिष्कस्य शासनकाले एव विरचिता विद्यते इति समामनन्तीतिहासविदः। अश्वघोषकृतशारिपुत्रप्रकरणस्य पाण्डुलिपिं दृष्ट्वा तत्रस्यहस्तलिपिमधीत्य च कविरयं कनिष्ककालिक एवेति निश्चिन्वन्ति लिपिविदो विद्वांसः। कनिष्कश्च कास्मिराधिपतिर्वरीवर्ति। अस्य समयः ईशायाः प्राक् प्रथमशताब्द इति इतिहासविदां मतम्। (शर्मा, सन् १८३३, पृ. ५०) केषाञ्चिन्मतानुसारमनेकेऽश्वघोषाः सन्ति। तेषु कतमोऽश्वघोषो बुद्धचरितस्य रचयितेति महान् शंसयः। विषयेऽस्मिन् न चाश्वघोषेण कनिष्कस्य नापि कनिष्केण अश्वघोषस्य क्वापि सम्बन्धः समुल्लितितो येन सडिण्डिमघोषं तथ्यमिदं स्थापयितुं शक्येत। तथापि प्रमाणान्तराप्राप्तौ एतान्येव तथ्यानि प्रामाण्यं भजन्ते। अतो यदवधि सत्तर्कपुष्टं प्रबलं तथ्यान्तरं नैव विनिर्णीयते तदवधि महाकवेरश्वघोषस्य समयः ईशायाः प्राक् प्रथमशताब्द एव। कविनानेन कानिग्रन्थरत्नानि विरचितानि इत्यपि इदमित्थन्तया तर्कयितुं नैव प्रभविष्णवोऽनुसन्धातारः। सामान्यतयाश्वघोषविरचितेषु ग्रन्थेषु सूत्रालङ्कारः महायानश्रद्धोत्पादः, शारिपुत्रप्रकरणम्, बुद्धचरितम्, सौन्दरानन्दमहाकाव्यम् चेति ज्ञायन्ते। एतदतिरिक्ता अपि ग्रन्थाः कैश्चित् कुत्रचित् अश्वघोषविरचितत्वेन समुल्लिखिताः सन्ति परन्तु तत्र बलवत्प्रमाणं नैव प्राप्यते। काव्यरचनादिक्षेत्रे यथास्य गतिः तथैव धर्मदर्शनादिविषयेष्वपि अव्याहता गतिरवलोक्यते। अस्य कृतिषु केचन काव्यसम्बद्धाः केचन नाटकसम्बद्धाः, केचन बुद्धधर्मसम्बद्धाः, केचन बौद्धसम्प्रदायसम्बद्धाश्च ग्रन्थाः सन्ति। तेषु बुद्धचरितम्, सौन्दरानन्दश्चेति द्वे महाकाव्ये स्तः। काव्यग्रन्थेष्वपि धर्मसम्बद्धाः आध्यात्मिकाः एव विषयाः प्रायः विवेचिताः सन्ति ग्रन्थप्रणयनस्य प्रयोजनं स्वयं कविनैव स्पष्टमधिव्यक्तं यत् स्वकाव्यकौशलप्रकटनाय पाण्डित्यप्रदर्शनाय मया काव्यमिदं नैव सृष्टं जगद्धिताय लोकोपकाराय च ग्रन्थाः विरचिताः। अवश्यमेव मन्निर्मितग्रन्थेषु धनोन्मादेन मत्तानां महौषधम्, विषयसेवनेन शुष्काणां सदुपदेशादिकं

तथा तृष्णाग्निदग्धानां सन्तोषजलमुपलभ्यत इति (अश्वघोष, सन् १९५५, पृ. १०) एतावताश्वघोषविरचिताः सर्वेऽपि ग्रन्थाः शान्तरसप्रधानाः सद्यः परनिर्वृतिप्रयोजनाश्च सन्ति। अजरामरैरेभिर्ग्रन्थरत्नैर्महाकविरश्वघोषः कीर्तिकलेवरेणाकल्पान्तं जेजीव्यत इति।

### बुद्धचरितमहाकाव्यस्य वर्ण्यविषयः

बुद्धचरितमहाकाव्यमिति नाम्नैवावगम्यते यत् काव्येऽस्मिन् भगवतो नारायणस्यांशावतारस्य बुद्धस्य लोकोत्तरं पावनं चरितमुपवर्णितमिति। काव्यमिदं संस्कृतभाषायामपूर्णमुपलब्धमस्ति। चतुर्दशसर्गा एव संस्कृते प्राप्यन्ते। तत्रापि प्रथमसर्गस्य आद्याः सप्त श्लोकास्तथा चतुर्दशसर्गस्य उत्तरार्धस्य प्रायः सर्वेऽपि श्लोकाः खण्डिताः सन्ति। समग्रोऽयं ग्रन्थः अष्टाविंशतिसर्गात्मकः विद्यते। पञ्चमशताब्द्यां धर्माक्षरनामकेन विदुषा विहिते चीनभाषानुवादेऽष्टाविंशतिसर्गा एव सन्ति तथा सप्तमशताब्द्यां केनचिद्विहिते तिब्बतीभाषानुवादे च अष्टाविंशतिसर्गा एव वेदविद्यन्त इति तदनन्तरमेव दैवदुर्नियोगात् ग्रन्थोऽयं नष्टो भ्रष्टश्च जातः। अक्सफोर्डविश्वविद्यालयस्य प्राध्यापकेन संस्कृतविदुषा जोन्स्टनमहोदयेन समग्रस्य महाकाव्यस्य आङ्गलभाषायामनुवादो विहितः। अस्यानुवादस्याधारस्तिब्बतीभाषानुवाद आसीत्। पुनश्च तमनुवादमाधृत्य भारतीयविद्वद्भिः संस्कृतभाषायामुपलब्धस्य चतुर्दशसर्गान्तिभागस्य खण्डितांशः पूरितस्तथावशिष्टसर्गाणामपि हिन्दीभाषायामनुवादश्च प्रणीतः। एतावता सम्प्रति समुपलब्धस्य काव्यस्य चतुर्दशसर्गान्तिभागस्य केचन खण्डितांशास्तथा हिन्दीभाषासम्बद्धाः अवशिष्टसर्गाश्च द्रविडप्रणायामन्यायेनास्माभिः सम्प्राप्ताः। यतो हि पूर्वं संस्कृतस्य मूलग्रन्थस्य चीनभाषायामुनवादो जातः, तस्य पुनः तिब्बतीभाषायाम्, तस्यापि जोन्स्टनद्वारा आङ्गलभाषायामनुवादः। तस्याधारे च संस्कृतपद्यानां मूलोद्धारस्तथा हिन्दीभाषायामनुवादश्चेति चक्रिकान्यायोऽप्यत्र संगच्छते। बह्वायासेन काव्यमिदं पुरतो राराज्यते। समग्रेऽस्मिन् महाकाव्ये बुद्धस्य जून्मतः निर्वाणप्राप्तिपर्यन्तस्य कथास्ति वर्णिता। चतुर्दशसर्गं यावद् बुद्धत्वप्राप्तिपर्यन्ता वृत्तान्ता विवृताः। भागोऽयं संस्कृते एव राजते। अत्र सर्गाणामभिधानमपि पृथक् पृथक् समुल्लिखितं तथोपन्यस्तवृत्तान्तानुकूलं च वरीवर्ति।

तत्र भगवत्प्रसूत्याख्ये प्रथमसर्गे भगवतो बुद्धस्य जन्मसन्दर्भो वर्णितः। लुम्बिनीवने मायायाः कुक्षीं निर्भिद्य समुत्पन्नः सिद्धार्थः सद्यः एव सप्त पदानि गत्वा "बोधाय जातोऽस्मि जगद्धितार्थमन्त्या भवोत्पत्तिरियं ममेति।" (अश्वघोष, सन् १९५५, पृ. ३) इति समुद्घोषितवान्। विलक्षणसुतोत्पत्तेः हर्षितो भीतश्च शुद्धोदनो ब्राह्मणादीनां शुभाशीर्वचोभिः समाश्वस्तो राज्यं प्रविश्य पुत्रस्य जातकर्मादिसंस्कारं चान्वतिष्ठत्, प्रजानुरञ्जनाय हर्षोल्लासादिकञ्चाज्ञापयत्।

एवमन्तःपुरविहाराभिधे द्वितीयसर्गे च पुत्रोत्पत्त्यनन्तरं राज्ये लोकोत्तराकल्पनीया समृद्धिः जातेति पुत्रस्य नामधेयं 'सर्वार्थसिद्ध' इति परिकल्पितम्। स्वपुत्रस्यानितरसाधारणं प्रभावं विलक्षणा चेष्टा चासहमाना बालकमाता मायादेवी स्वर्गमारुरोह। कालक्रमेणोपनयनादिसंस्कारसंस्कृतो बालो नातिदीर्घेणैवानेहसा स्वकुलोचितां निखिलां विद्यामध्यगात्। स्वपुत्रे विषयासक्तिं कामयमानः शुद्धोदनो यशोधराख्यया कन्यया सह कुमारस्य दाम्पत्यसम्बन्धं बबन्ध। अन्तःपुरयुवतिभिः विहाराय चायं प्रेरितः। विषयेषु निर्विण्णोऽपि गच्छति काले यशोधरायां राहुलाख्यं पुत्ररत्नमुदपायदयत्। ततो राजातिप्रसन्नः सन् कुमारस्य सुगार्हस्थ्यं प्रार्थयामास इत्युदन्ताः वर्णिताः।

तृतीयसर्गस्य नाम संवेगोत्पत्तिरित्याख्यातम्। सर्गेऽस्मिन् महात्मनो बुद्धस्य वैराग्योत्पत्तिश्चित्रिता। कदाचित् वनशोभायाः वर्णनं श्रुतवतो बुद्धस्य मनसि विपिनविहारेच्छास्पदं चकार। कुमारस्य स्पृहां प्रबलां परिलक्ष्य निवारयितुमक्षमो राजा राजपथं वृद्धातुरादिरहितं निर्वत्य गमनायानुज्ञामयच्छत्। कुमारोऽपि स्वर्णरथारूढः कुशलसारथिसमेतो वनं प्रातिष्ठत्। तदा मार्गमध्ये मायानिर्मितो देवैः प्रेरितः कश्चित् वृद्धः कुमारस्याकमस्मात् पुरतोऽपतत्। गलिताङ्गं पलितोत्तमाङ्गं धमनिसन्ततञ्च तं विलोक्य सकौतुकावेशं कोऽयमिति सारथिं पप्रच्छ। सारथिना च 'वृद्धमनुष्योऽयमिति' ज्ञापयता रूपादिहारिणी जरा तत्पुरतः साञ्जलिपुटबन्धं वर्णिता – "रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्। नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः॥ (अश्वघोष, सन् १९५५, पृ. ५०)" इति। सूतोक्तिं श्रुत्वेयमवस्था ममाप्यवश्यं भाविनीति अनुसन्धाय परं निर्वेदमापन्नो निवर्तनाय सारथिं प्रैरयत्। अनया रीत्या पुनः पुनः राजकुमारे वनं प्रस्थिते रूग्णपुरुषगस्य, मृतपुरुषस्य च दर्शनं जातम्, तेन कुमारस्य मनसि वैराग्यस्य संवेगः समुद्भूतः।

चतुर्थे स्त्रीनिवारणसर्गे च निर्विण्णस्य कुमारस्य आश्वासनायानुरागोत्पादनाय च सुन्दर्यः नगरस्त्रियः समाजग्मुः। ताभिः मनोहरणानुकूला विविधाश्चेष्टाश्च प्रकटिताः। परन्तु राजकुमारे न कोऽपि प्रभावो विकारो वा समजनि। "अनित्यं तु जगन्मत्वा नात्र मे रमते मनः (अश्वघोष, सन् १९५५, पृ. ३०)" इति हठात् भौतिकभोगविलासादिकं दूरतस्तिरस्कृत्य स्वाभिलसिते पारमार्थिके वस्तुनि दृढं मनो बबन्ध। ततः स्त्रियः भग्नाशा भग्नसङ्कल्पा न्यवर्तन्त। कुमारस्यैतादृशीमकल्पनीयां स्थितिं समस्तविषयेषु विरतिमेकान्तवासादिषु रतिञ्च विलोक्य शुद्धोदनो राजा दुःखशोकभयान्वितो बभूव। क्षुन्निद्रादयोऽपि नान्वभाविषत।

पञ्चमसर्गस्य नामधेयमभिनिष्क्रमणमस्ति। सर्गेऽस्मिन् बुद्धस्य गृहान्निर्गमसम्बद्धः प्रसङ्गः प्रस्तुतोऽस्ति। अधीरो राजकुमार एकदा पुनः वनं गन्तुमियेष। राज्ञोऽनुज्ञां गृहीत्वा वनं गतः स हरिततृणाच्छादिते कस्मिँश्चित्स्थाने स्थित्वा प्राणिनां जन्ममृत्यविषये चिरमचिन्तयत्। रहसि एकाग्रेण चेतसा चिन्तनपरवशे तस्मिन् भिक्षुरूपधरः कश्चित्पुरुषः कुमारस्य पुरतोऽदृश्यत। सानुनयातिशयं कुमारेण पृष्टः स जन्ममृत्युजरादिभ्यः भीतं मुक्तये संन्यस्तमात्मकल्याणाय भ्रमन्तमात्मानं पर्यचाययत्। पुरुषस्यास्य प्रभावात् सद्यः प्रभावितो राजकुमारो गृहं प्राप्य पितरं मुक्तये संन्यासाय गृहत्यागाय चानुज्ञामयाचत। पुत्रवचनं श्रोतुमक्षमो राजा सकम्पं साश्रुपूर्णनेत्रमुवाच – भो तात ! नायं तव धर्मसेवनकालः। राज्यभोगान् भुङ्क्ष्व, मतिमिमां त्यजेति, परं तस्मान्मार्गात्कुमारोऽयं नैव विरतः। ततो निवृत्तावेव स्वपुत्रस्य विशेषाभिरुचिं दृष्ट्वा राजा कुमारस्य विषयभोगाय, संरक्षणाय च वनितानिवहान् रक्षापुरुषाँश्च नियोजयामास। परन्तु राजप्रासादान्निर्गमने दृढसङ्कल्पो राजकुमारो रात्रौ सर्वान् तिरस्कृत्य भोगाँश्च विनिन्द्य छन्दकसहायः 'जननमरणयोरदृष्टपारो न पुरमहं कपिलाह्वयं प्रवेष्टा। (अश्वघोष, सन् १९५५, पृ. ४०)' इति प्रतिज्ञाय प्रासादान्निर्जगाम।

षष्ठे सर्गे च अश्वरक्षकस्य छन्दकस्य निवर्तनसम्बद्धो वृत्तान्तो निबद्धोऽस्ति। अतः सर्गोऽयं छन्दकविसर्जननाम्ना परिचीयते। प्रातःकाले समुदिते भगवति भास्करे राजगृहान्निर्गतो राजकुमारो बहुयोजनदूरं प्राप्तः। तत्र च भार्गवस्याश्रमोऽदृश्यत। ततोऽश्वपीठादवतीर्णः कुमारः निखिलमाभूषणादिकं निस्कास्य छन्दकाय समर्प्य सधन्यवादोपहारं छन्दकं राज्यं प्रति निवर्तयितुं प्रैरयत्। स्वामिनो गृहत्यागादिकार्येणासन्तुष्टश्छन्दकश्च सम्प्रति वयोवृद्धस्य पितुस्तथा पतिव्रताया धर्मपत्न्याः, नवजातपुत्रस्य च परित्यागो न कथञ्चिदपि उपयुक्त इत्यादिवचसा सम्बोधितवान्। कृतघ्नवन्नैव व्यवहर्तव्यं लोके इत्यपि समुद्बोध्य गमनान्निवारयितुं प्रायतत। परन्तु दृढप्रतिज्ञो

राजकुमारः स्वमार्गान्नैव विचचाल। कुमारेणानुनीतो विनीतश्च छन्दकोऽन्त्ये आत्मानं बलवन्निरुध्य निरुत्साहं शनैः शनैः राज्याय प्रातिष्ठत।

सप्तमे सर्गे च सर्वार्थसिद्धकुमारस्य तपोवनप्रवेशप्रसङ्गः प्रदर्शितः। अष्टमे सर्गे चान्तःपुरविलासप्रसङ्गः वर्णितः। कुमारं परित्यज्य समागतश्छन्दकः एकरात्रौ लङ्घितमध्वानं अष्टभिर्दिवसैः कथमपि अतीत्य राजप्रासादं प्राप्तः। कुमाररहितं साश्वं छन्दकं दृष्ट्वा च सर्वे व्यथिता जाताः। कैश्चित्तु कुमारापगमेऽयमेव कारणमिति छन्दको भर्त्सितोऽपि। परं नात्र केषाञ्चिदपि दोष इति सर्वैर्ज्ञातम्। अन्तःपुरस्थस्त्रीषु पुरुषेषु प्रजासु च महान् शोको जातः। कुमारप्राप्तये तस्य मङ्गलाय च राज्ञा माङ्गलिकमनुष्ठानं प्रारब्धम्। अन्वेषणाय निवर्तनाय च जनाः वनं प्रातिष्ठन्त।

नवमे कुमारान्वेषणसर्गे च मन्त्रिपुरोहितैः भार्गवाश्रमं प्राप्य भार्गववचनानुसारं अरादाश्रमसमीपे कुमारोऽन्विष्टः प्राप्तश्च। ततस्तैः निवर्तयितुं लौकिकपौराणिकसूक्तिभिः प्रेरितोऽपि काषायाम्बरधरः कुमारः "अहम् अग्निं प्रविशामि परं न गृहम्" इत्युक्त्वा एकतोऽगात्। मन्त्रिपुरोहिताश्च म्लानाननाः शनैः नगरं ययुः।

दशमसर्गे च मगधराजबिम्बसारेण सह कुमारस्य समागमो वर्णितः। तत्र राज्यग्रहणाय यौवनावस्थायां विषयभोगाय च कुमारः बिम्बसारेण प्रार्थितः परं "नाहं सर्पवज्रादिभ्यो बिभेमि परन्तु विषयाद्बिभेमीति" उक्त्वा स भोगान् तिरश्चकार।

कामगर्हणाख्ये एकादशसर्गे च विषयभोगादिकं प्रार्थयन्तं बिम्बसारं प्रति कुमारस्य प्रत्युत्तरं वर्णितमस्ति। काम एवानर्थस्य मूलमिति पौराणिकमुदाहरणं प्रस्तुत्यात्र कामनिन्दा निरूपिता।

द्वादशसर्गे च कुमारं प्रति अराडमुनेः ज्ञानोपदेशो व्याख्यातः। सर्गेऽस्मिन् अराडमुनेः सम्प्राप्तं तत्त्वोपदेशमपूर्णं मत्त्वा कुमारो गयां प्रस्थितः। तत्र नैरञ्जननद्याः पावने तटेऽश्वत्थमूले बोधप्राप्तये स्थिरमासनं बबन्ध।

त्रयोदशसर्गश्च भारविजयनाम्ना परिचीयते। सर्गेऽस्मिन् कुमारस्य कामदेवविजयो वर्णितोऽस्ति। मुनिकल्पः कुमारो यदाश्वत्थमूले स्थिरासने संस्थितस्तदा सर्वे प्रसन्नाः सानुकूलाश्च जाताः। परं सर्वलोकविजयी कामदेवः भयभीतो रुष्टश्च समजायत। ततः सपरिवारः ससैन्यश्च कन्दर्पः कुमारं वशीकर्तुं शरासनं स्वीकृत्य बाणं प्राहरत्। परं कुमारे न कोऽपि प्रभावोऽदृश्यत। पुनः पुनरपि विहितेऽपि प्रयासे मारो निःसारो बभूव। आकाशवाण्या च कामदेवो भर्त्सितः, कुमारश्च प्रशंसितः। ततो लज्जितः सन् सपरिवारो मारो निवर्तितः। कमारोपरि च पुष्पवृष्टिर्जाता।

चतुर्दशसर्गे च कुमारस्य बुद्धत्वप्राप्तिविषयको वृत्तान्तो वर्णितोऽस्ति। मारविजयानन्तरं कुमारो ध्यानमग्नो बभूव। ततो ध्यानात् प्रथमचरणे जन्मजन्मान्तरविषयिणी दृष्टिः, द्वितीयचरणे ब्रह्माण्डविषयिणी दिव्यदृष्टिश्च तेन महात्मनाधिगता। क्रमशः अखिलं तत्त्वज्ञानं प्राप्य स करामलकवद्विश्वमवलोकितवान्। ततो ज्ञानोपदेशाय देवैः प्रेरितः काशीं जिगमिषु बोधिवृक्षात् शुभदृष्टिमपातयत्।

चतुर्दशसर्गं यावत् एते एव विषयाः काव्येऽस्मिन् वर्णिताः सन्ति। संस्कृते तावन्त एव सर्गाः समुपलब्धाः सन्तीति तदूर्ध्वमत्र नैव विचार्यते।

बुद्धचरितमहाकाव्यस्याधारभूता एते वर्ण्यविषयाः कविना कुतः सङ्गृहीताः स्युरिति जिज्ञासूनां मनसि कदाचिद् विचारः समुदेति। काव्यानि महाकाव्यानि च कमपि ऐतिहासिकग्रन्थसन्दर्भं लोकप्रसिद्धमुदात्तवृत्तान्तं वाधृत्य निर्मीयन्ते

"इतिहासोद्भवं वृत्तम् (विश्वनाथ, २०७६, पृ. ५४३) इति"। अश्वघोषेणापि अवश्यं कोऽपि बौद्धसम्बद्धो ग्रन्थः समाधृतः स्यात्। विषयेऽस्मिन् विदुषां समानधारणा न दृश्यते। केचन विद्वांसो बुद्धचरितमहाकाव्यस्योपजीव्यं महापरिनिर्वाणसूत्राख्यग्रन्थमङ्गीकुर्वन्ति चेत् केचन हीनयानसम्प्रदायसम्बद्धं ललितविस्तरनामकमपरं ग्रन्थमुपजीव्यत्वेन समामनन्ति। केचन विवेचकाश्च बुद्धचरितमहाकाव्यस्य कथाः कस्यचित् ग्रन्थस्य कथाप्रसङ्गेन सह साम्यं न भजतेऽतः कविना बहवो ग्रन्थाः कथाधारत्वेन स्वीकृताः। तत्र च महावस्तु-ललितविस्तर-निदानकथा-जातककथादयो ग्रन्थाः स्वीकृताः स्युरिति मतं प्रस्तुवन्ति। विषयेऽस्मिन् विदुषां विचारधाराः अजस्रं प्रवाहिताः स्युः इति कथने नास्ति कस्यापि कापि क्षतिः। परं काव्यस्य वर्ण्यविषयोऽभिव्यक्तो भावश्चाध्यात्मिको ग्रहणीयश्च विद्यते। "चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्" (विश्वनाथ, २०७६, पृ. ५९१) इति महाकाव्यलक्षणानुसारं काव्यमिदं बुद्धचरितं मोक्षफलकं निष्पद्यते। वर्ण्यविषयदृष्ट्या काव्यमिदमद्वितीयं प्रतिभाति। स्वगुणगरिम्णा च सर्वाण्यतिशेते।

## बुद्धचरितमहाकाव्यस्य प्रथमसर्गीयो विषयः

बुद्धचरितमहाकाव्यं भगवतो बुद्धस्य लोकोत्तरं चरितं चिनुते जगति चकाशयति च। रामायणरचनया महर्षिवाल्मीकिना रामचरितं यथा गीतम्, महाभारत-भागवतादिरचनया वेदव्यासेन च कृष्णचरितं यथा गीतं तथैव बुद्धचरितमहाकाव्यरचनयाश्वघोषेणापि शौद्धोदनेर्बुद्धस्य चारुचरितं साधु चित्रितं यथायथं प्रचारितं च। "रामो विग्रहवान् धर्मः (वाल्मीकि, सन् १९६०, पृ.५० )" "नरदेवत्वमापन्नः सुरकार्यचिकीर्षया (वेदव्यास, २०७५, पृ. ३४)" इत्यादिशास्त्रवचसा दासरथे रामस्य भगवदंशावतारत्वे न काचिच्छंका। "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" (वेदव्यास, श्रीमद्भगवद्गीता, २०७५, पृ. ३३)। "कृष्णस्तु भगवान् स्वयम्" (वेदव्यास, २०७५, पृ. ३४) इत्यादिभिः स्मृतिपुराणादिभिश्च कृष्णस्य भगवद्रूपत्वेऽपि यथा न काचिद् विप्रतिपत्तिस्तथैव "बुद्धो नाम्ना जनसुतः कीकटेषु भविष्यति (वेदव्यास, २०७५, पृ. ३४) दशावतारगणनाक्रमे "बुद्धः कल्किस्तथैव च (ग.पु.)" संकल्पवाक्यादिषु "बौद्धावतारे" इत्यादिबहुभिः प्रमाणवाक्यैः बुद्धस्यापि भगवद्रूपत्वं दुर्निवारम्। कोशादिषु बुद्धस्य नामगणनाक्रमेऽपि *समन्तभद्रो भगवान्* (अमरसिंह, २०७७, पृ. २) इति भगवच्छब्द बुद्धे प्रयुक्तो दृश्यते। अतः बुद्धः नारायणस्यांशावतारः। तस्यैव चरितं काव्येऽस्मिन् प्रस्तुतमिति नाम्नः सार्थकत्वमपि ज्ञायते। काव्यस्यास्य प्रथमसर्गस्य नामधेयमपि भगवत्प्रसूतिरिति प्रतिष्ठापितमस्ति। संस्कृतसंबद्धेषु चतुर्दशसर्गेषु मध्ये प्रथमे सर्गे केवलं बुद्धस्य जन्मप्रसङ्ग एवोपस्थापितः। काव्यमिदमपूर्णमस्ति। तत्रापि प्रथमसर्गश्चतुर्दशसर्गश्च खण्डितो विद्यते। प्रथमसर्गस्य आद्याः सप्तश्लोकास्तथा चतुदर्शसर्गस्योत्तरार्धस्य बहवः श्लोकाश्च पूर्णतो नष्टाः सन्ति। प्रथमसर्गस्य अन्ये केचन श्लोकाश्चांशतो खण्डिता अजायन्त। तत्तच्छलोकानां पूर्णतः पूरणं खण्डितांशानां पूरणं च ग्रन्थसम्पादकैर्विद्वद्भिर्विहितम्। अतः प्रतिप्रकाशनं केषाञ्चन पूर्णपद्यानां खण्डितखण्डानां च पाठभेदः सुनिश्चितः। तस्मात् प्रथमसर्गस्य बहवः पाठभेदाः दरीदृश्यन्ते। कैश्चिद् विद्वद्भिराद्यानां सप्तपद्यानां तथा अपूर्णानां निश्चितपद्यानामेव यथावश्यकं पूरणं व्यवस्थापितं चेत् कैश्चित् आवश्यकातिरिक्तविषयेष्वपि यथावसरलाभं हस्तक्षेपो व्यधायीति मन्यामहे। प्रथमसर्गस्यादितः सप्तश्लोकाः पूर्णतो न सन्ति चेत् पञ्चविंशतिश्लोकाच्चत्वारिंशच्छलोकं यावत् षोडशश्लोकानां तृतीयपादो विनष्टोऽस्ति अतस्तत्तत्स्थलेषु सम्पादकभेदात् पाठभेदो निश्चितः समुचितश्च। केषाञ्चन विदुषां सम्पादने तद्भिन्नस्थलेष्वपि पाठभेदः श्लोकसंख्यायां न्यूनाधिक्यं च वर्वर्तीति विचारणीयोऽयं विषयः। भगवच्चरितभरितस्य बुद्धचरितस्य प्रमाण्यायानुपमस्यास्य काव्यस्य सुप्रचाराय चास्मिन्नेकरूपतापेक्षिता। यदा कस्मिँश्चिद्विषये जनानां विमतिर्जायते भिन्ना

मतिर्वा सम्भाव्यते ततस्तादृशो विषयो नैव स्थिरतामेति न च लोकविश्वासं समाकलयति। अतः विद्वद्भिर्बुद्धचरितस्यैकरूप्यं संयोजनीयम्। तत्र सर्वसम्मतिश्च विभावनीया। बुद्धोपदिष्टे बौद्धदर्शने यथा माध्यमिक-योगाचार-सौत्रान्तिकादि बहवो भेदाः दृश्यन्ते, तथैव बुद्धचरितमहाकाव्येऽपि बहवः पाठभेदाः समायाताः। एते धीधनैर्विद्वद्भिरकालक्षेपं निवारणीयाः। अनेन न केवलं काव्यस्यापितु काव्यरसिकानामपि भद्रं भविष्यति।

काव्यमिदं बुद्धचरितं बुद्धस्य जन्मप्रसङ्गात् प्रारभ्यते। अतः प्रथमसर्गस्य नामधेयमेव भगवत्प्रसूतिरिति विहितमस्ति। कथाप्रसङ्गानुसारम् – इक्ष्वाकुवंशे प्रजानां प्रियः शुद्धोदनाख्यः कश्चन राजासीत्। तस्य च साक्षाल्लक्ष्मीरिव मायादेवीनाम्नी राज्ञी बभूव। ऐश्वर्ये धनदोपमोऽयं राजा स्वपत्न्या सह बहुकालं विजहार। गच्छति काले राजमहिषी मायादेवी च गर्भमाधत्त। कदाचिद् गर्भं गृह्णन्ती स्वप्नसमये स्वकुक्षीं विशन्तं गौरं गजराजमन्वभवत्। कालक्रमाद् गर्भभारभरालसा राज्ञी ध्यानानुकूलं विजनं लुम्बिनीवनं गन्तुमियेष। अन्तर्वत्न्याः स्वपत्न्याः शुभाशयमनुभूय राजापि तत्प्रीतये कपिलाख्यं सुन्दरं स्वनगरं त्यक्त्वा वनान्तं प्रापत्। लुम्बिनीवने निवसन्ती राजमहिषी स्वप्रसवकालमासन्नं ज्ञात्वा तदनुकूलां शय्यां समाश्रयत्। तदा शुश्रूषयन्त्योऽसंख्याः अवलाः परितो बभूवुः। पुष्यनक्षत्रयुक्ते शुभमुहूर्ते व्रतादिपरिपूतायाः राज्ञ्याः कुक्षीपार्श्वात् लोकहिताय सुतोऽसूत। राज्ञ्या प्रसवादिपीडा च नैवानुभूयत। जात एव प्रबुद्धोऽयं बालः भास्करवत् दिशो भासयन् सद्यः एव सप्त पदानि चचाल तथा परितो दृष्टिं भ्रामयन् "लोकहिताय ज्ञानप्राप्त्यर्थं जातोऽस्मि, ममेदं चरमं जन्म" इति सोत्साहं जगाद। ततो गगनात् शुभ्रं सशीतोष्णं जलधाराद्वयं बालकस्य मस्तकोपरि पपात। देवयक्षनागजातिभिश्च सहर्षं सबहुमानं बालोऽयमभिनन्दितः। निर्मलाद् गगनाच्च चित्रविचित्राणि कमलपुष्पाणि ववर्षुः। निवासस्थानादुत्तरस्यां निर्मलजलपूर्णः कासारोऽकस्मात् प्रादुर्बभूव, यत्र वनान्तवासिभिर्जनैः तीर्थवत् सकौतुकावेशं निखिला क्रिया निरवर्त्यत। वनभूमौ सुसमृद्धिः, प्राणिषु मिथः निर्वैरं, सर्वत्र शान्तिश्चान्वभावि। नभसि देवदुन्दुभयो नेदुः। विशेषतः कन्दर्पं विहाय सर्वत्र सर्वे सुखमन्वभूवन्। बालकस्यानितरसाधारणं प्रभावं विलोक्य ससहायो राजा हर्षं भीतिं च प्रापत्। पुनः सद्ब्राह्मणेभ्यः पुत्रमहिमानं श्रुत्वा स शान्तिमवाप। पुत्रेऽस्मिन्नपूर्वगुणोदयः कथमिति राज्ञो जिज्ञासापि ब्राह्मणैरशामि। ततो राज्ञा ब्राह्मणाः सधन्यवादोपहारमभ्यनन्दन्त। तदनन्तरं स्वतपोदृशा विलक्षणबालकस्य जनिं मत्वा तत्रासिताख्यो महर्षिश्च समाजगाम। राजपुरोहितादिभिः सुसत्कृतोऽसितः कुमारं दिदृक्षुः सम्प्राप्त इति विजानता राज्ञा कुमारो दर्शितः। विलक्षणलक्षणलक्षिते कुमारे दृष्टेऽसितमहर्षौ असाधारणीं प्रतिकृतिमनुभूय सशङ्कितो राजा तद्हेतुमसितमहर्षिमपृच्छत्। महर्षिणा च पुत्रस्य लोकोत्तरगुणवर्णनेन राज्ञो भीतिर्निवारिता। मुदं प्राप्तवति राजनि असितश्च ततो निर्जगाम। पुत्रोत्पत्तिमहोत्सवे राज्ञा वन्दिवृन्दममुच्यत। दशाहे पुत्रस्य क्षेमकामो गोदानजपहोमादिमाङ्गलिकं यागं समपादयते। ततः शुभमुहूर्ते सुशिबिकारूढां राजमहिषीं पुरस्कृत्य राजा नगरं प्रविवेश। राजदम्पती अभिनन्दन्तः पौराश्च हर्षोत्कर्षं प्रापुः। तदा नलकुबरोत्पत्तौ कुबेरपुरमिव कपिलाख्यं नगरमपि राजकुमारजन्मना मोदान्वितं बभूवेति प्रथमसर्गसङ्क्षेपः।

सर्गेऽस्मिन् सूर्यनारायणचौधरीसम्पादितग्रन्थानुसारमेकोननवतिपद्यानि विलसन्ति चेत् ग्रन्थान्तरानुसारं न्यूनाधिकान्यपि भवितुमर्हन्ति। सर्गान्तस्य दश पद्यानि विहायान्यानि इन्द्रवज्रोपजातिवृत्तयोर्निबद्धानि सन्ति दशपद्यानि च पुष्पिताग्राछन्दस्याबद्धानि विद्यन्ते। खण्डितांशस्य पाठभेदात् कथाप्रसङ्गेऽपि वैविध्यं क्वचित् सम्भवतीति विचारवन्तो जिज्ञासवः स्वयमेवावश्यमवगच्छन्तीति किं वचः प्रपञ्चनीयम्?

## उपसंहारः

साकेतनिवासिनो भदन्ताश्वघोषस्य सुप्रसिद्धं महाकाव्यं बुद्धचरितं कालिदासीयकाव्यानां स्थानमावहतीति विदुषां विचारः। महाकाव्यलक्षणदृशा नैतदुत्तमं काव्यं किन्तु मध्यमश्रेणीयमिति (शर्मा, सन् १८३३, पृ.५) केचनान्ये समामनन्ति। काव्येऽस्मिन् कियन्तचिदुपवर्णनीया अपि विषया नैवोपस्थापितास्तथा अवर्णनिया अप्यंशाः वर्णिता सन्तीति विश्लेषकाणामाक्षेपोऽनुभूयते। काव्यस्यास्य द्वितीये सर्गे राजकुमारस्य मातुः मायादेव्याः स्वःप्रयाणं केवलं नाम्नैव निर्दिष्टं प्राप्यते। न तत्र कविना किमपि कवित्वं प्रकटितं वर्णनादिकं वोपस्थापितम्। काव्यकलाविद्भिः प्रसङ्गेऽस्मिन् विषयवैपुल्यमपेक्षितमासीत्। एवमेव क्वचित् स्त्रीणां स्वापोपवर्णनादिकं तथोपवने युवतीनां चेष्टादिकं चानावश्यकमपि विपुलीकृतमित्यालोचयन्ति समालोचनचक्षुष्काः विवेचकाः। दोषज्ञाः काव्येऽस्मिन् बहुत्र नानाविधकाव्यदोषानपि प्रदर्शयन्तीति काव्यस्यास्यावरत्वं निश्चीयते काव्यमर्मविद्भिर्विद्वद्भिः। निर्मितिदृष्ट्या शब्दसङ्घटनादिदृष्ट्या वा काव्यस्य स्वरूपं यादृशमपि स्यात् परं विषयवस्तुदृष्ट्या भावदृष्ट्या वा काव्यमिदं बुद्धचरितं सर्वाणि काव्यानि अतिशेते। काव्यस्य कथानकं अध्यात्मोन्मुखं वर्वर्तीति शृङ्गारवीरादिलौकिकरसास्वादनापेक्षयात्र ब्रह्मानन्दरूपस्यालौकिकरसस्य समास्वादो बोभवीति। चिन्तकानां चेतसि क्षणिकेषु निःसारेषु च विषयेषु विरतिं सम्पाद्य काव्यमिदं पारमार्थिके वस्तुनि रतिमुत्पादयति। 'अनित्यं तु जगन्मत्त्वा नात्र मे रमते मनः (अश्वघोष, सन् १९५५, पृ. ५०)' इति कुमारभणितिः तदेव प्रमाणयति। शास्त्रेषु तत्त्वज्ञानाधिगमाय मार्गद्वयमुपदिष्टम्। प्रवृत्तिमार्गो निवृत्तिमार्गश्च। 'प्रवृत्तिलक्षणो धर्मः निवृत्तिश्च विभावितः (वेदव्यासः, २०००, पृ. ३२०)' इति। अन्यानि काव्यानि प्रवृत्तिमार्गमाध्यमेन 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम् (मम्मट, २०२१, पृ. ८)' प्रयच्छन्ति। परं काव्यमिदं बुद्धचरितं निवृत्तिमार्गोपदेशव्याजेन अक्षयं पदं प्रदर्शयति। 'येनाहं नामृता स्यां किमहं तेन कुर्याम् (सुब्रह्मण्यशास्त्री, २०४३, पृ. ८०)' इति उपनिषदां हार्दमत्रानुस्यूतमनुभूयते। काव्ये समुच्छलितानि महार्हमौक्तिकतुल्यानि सुभाषितानि विशिष्टं दर्शनं पारमार्थिकं चिन्तनं च द्योतयन्ति। तत्तत्प्रसङ्गे सिद्धार्थमुखात् कविना समुच्चारितानि वचनानि जनानां जीवनं परिवर्तयितुं क्षमन्ते। रात्रौ गृहत्यागसमये कृता दृढप्रतिज्ञा 'जननमरणयोरदृष्टपारो न पुरमहं कपिलाह्वयं प्रवेष्टा (अश्वघोष, सन् १९५५, पृ. १५०)' इति, तथा मन्त्रिपुरोहितैः गृहं निवर्तयितुं कृतायां प्रार्थनायां समुद्घोषितम्- 'अहं विशेयं ज्वलितं हुताशनं न चाकृतार्थः प्रविशेयमालयम् (अश्वघोष, सन् १९५५, पृ. २००)' इति वचनं च पाठकानां श्रोतॄणां च रोमाञ्चं विधत्ते। काव्यमिदं विचार्य जनाः स्वहृदि शान्तरसमनुभवन्ति, संसारविषयेभ्यश्चोपरता जायन्ते। 'नाशीविषेभ्यो न तथा बिभेमि यथा भयं मे विषयेभ्य एव (बु.च. ११/८)' इति बुद्धवचनाच्च विषयविषात् भेतव्यमिति अवगम्यते। चीनदेशीयपथिकेन च काव्यमिदं मुक्तकण्ठेन प्रशंसितम् – 'भूयो भूयः काव्यस्यास्य श्रवणपाठनादिनापि पुनः श्रवणेच्छा नैव शाम्यतीति (अश्वघोष, सन् १९५५, पृ. १०)' स्वकाव्यप्रयोजनं निर्दिशता कविना स्वयमेव उक्तं यत् – 'काव्यकौशलप्रदर्शनाय पाण्डित्यप्रकटनाय च काव्यमिदं मया नैव विरचितम्, लोकोपकाराय, जगद्धिताय, दुःखार्तानां सुखस्य मार्गप्रदर्शनाय च काव्यस्य रचना जातेति (अश्वघोष, सन् १९५५, पृ. १०)' इति।

वस्तुतो बुद्धचरितं तादृशं महाकाव्यं वेविद्यते यत्र बुद्धसिद्धान्ताः तज्जीवनवृत्तान्ताश्चाहमहमिकया मिथो निबद्धाः सन्ति। विषयप्रतिपादनं चात्र नैसर्गिकं प्रभावोत्पादकं च दृश्यते। काव्यमिदं मोहमदिरोन्मत्तानां महौषधम्, अध्यात्मपथभ्रष्टानां पथप्रदर्शकं तृष्णाग्निदग्धानां च शीतलजलरूपं विद्यते। ''कान्तासम्मिततयोपदेशयुजे (मम्मट, २०२१, पृ. ६)'' इत्युक्तदिशा विचारकान् मृदुमार्गेण 'महान्तं विभुमात्मानं मत्वा धीरो न शोचति (ईशादि नौ उपनिषद्,

२०७४, पृ. ५०)’ इति जरारोगशोकादिरहितं अनिर्वचनीयं पदं समुपदिश्य इदमलौकिकं निरतिशयसुखं च परिचाययतीति।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञेभ्यो गुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची

अमरसिंह. (२०७७). *अमरकोश*. (चिरञ्जीवी खतिवडा, अनु.) देवघाट: ॐ नमः शिवाय प्रकाशन.
अश्वघोष. (सन् १९५५). *बुद्धचरितम्* (तृतीय सं.). (सूर्यनाराय चौधरी, अनु.) बिहार: संस्कृत भवन.
*ईशादि नौ उपनिषद्*. (२०७४). गोरखपुर: गीताप्रेस.
एस् सुब्रह्मण्यशास्त्री (सं.). (२०४३). *श्रीबृहदारण्यकोपनिषद्*. वाराणसी: महेश अनुसन्धान संस्थान.
मम्मट. (२०२१). *काव्यप्रकाश*. (बामनाचार्य रामभट्ट झलकिकर, अनु.) नयाँ दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान.
विश्वनाथ. (२०७६). *साहित्यदर्पण*. (शेषराजशर्मा रेग्मी, अनु.) वाराणसी: कृष्णदास अकादमी.
वेदव्यास. (२०७५). *श्रीमद्भगवद्गीता*. गोरखपुर: गीताप्रेस.
वेदव्यास. (२०७५). *श्रीमद्भागवतमहापुराणम्* (स्थूलाक्षरं मूलमात्रम्). गोरखपुर: गीताप्रेस.
वाल्मीकिः, (सन् १९६०), *वाल्मीकिरामायणम्*, गोरखपुर : गीताप्रेस।
शर्मा, अप्पा, (सन् १८३३), *बुद्धचरितम्*, कलकत्ता : सत्साहित्यप्रकाशन।
कालिदासः, (सन् १९९०), *रघुवंशमहाकाव्यम्* (पञ्चमसर्गः), वाराणसी : मोतीलाल वनारसी दास।
कालिदासः, (सन् २०००), *रघुवंशमहाकाव्यम्* (चतुर्दशसर्ग), वाराणसी : चौखम्बा संस्कृत संस्थान।
वेदव्यासः, (२०००), *महाभारत*, गोरखपुर : गीताप्रेस।